International Journal of Sanskrit Research 2021; 7(5): 22-26

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 22-26
© 2021 IJSR
www.anantaajournal.com
Received: 18-06-2021
Accepted: 20-08-2021

**उत्तम-माझिः**
शोधछात्रः, संस्कृत-पालि-प्राकृत-विभागः, भाषाभवनम्, विश्वभारती विश्वविद्यालयः, शान्तिनिकेतनम्, पश्चिमवङ्गः, भारत

**Corresponding Author:**
**उत्तम-माझिः**
शोधछात्रः, संस्कृत-पालि-प्राकृत-विभागः, भाषाभवनम्, विश्वभारती विश्वविद्यालयः, शान्तिनिकेतनम्, पश्चिमवङ्गः, भारत

# पाणिनिनये 'अनचि च' सूत्रस्य नञर्थसमीक्षा

## उत्तम-माझिः

**प्रबन्धसारः**
भगवता पाणिनिना विरचिताष्टाध्यायीग्रन्थे "अनचि च" इति अष्टमाध्यायस्य चतुर्थपादस्य सप्ताशीतितमं सूत्रम्। अस्मिन् सूत्रे 'अनचि,' 'च' इति पदद्वयं वर्तते। 'अनचि' इत्यनेन पदेन निषेधः क्रियते। अतः 'अनचि' इत्यत्र न अच् = अनच् तस्मिन् अनचीति नञ्समासः। सूत्रे अस्मिन् विधिवाक्यं निषेधवाक्यं च विद्यते। विधिवाक्यस्यार्थो भवति- अचोऽव्यवहितपरस्य यरः स्थाने द्वे वा भवतः। निषेधवाक्यस्यार्थो भवति- अचोऽव्यवहितपूर्वस्य यरः स्थाने द्वे न भवतः। नञर्थः द्विविधो वर्तते- पर्युदासः प्रसज्यप्रतिषेधश्च। "अनचि च" (८/४/८७) सूत्रे कस्मिन्नर्थे निषेधः विधीयते। तस्मिन् विषये वैयाकरणानां मध्ये पारस्पारिकं वैमत्यं प्रकटितम्। महाभाष्यकारः काशिकाकारः प्रक्रियाकौमुदीकारश्च पर्युदासपक्षः समर्थितः। अपरे तु शेखरकारः सिद्धान्तकौमुदीकारः बालमनोरमाकारः प्रदीपकारश्च प्रसज्यप्रतिषेधपक्षः समर्थितः। अतः कस्मिन्नर्थे निषेधो कर्तव्यः तस्मिन् विषये वैयाकरणानां मध्ये वैमत्यं परिलक्ष्यते। अतः प्रबन्धेऽस्मिन् वैयाकरणानां मध्ये वैमत्यमुल्लिख्य "अनचि च" (८/४/८७) सूत्रे नञर्थसमीक्षा प्रदीयते।

**कूटशब्दाः** अनच्, निषेधः, पर्युदासः, प्रसज्यप्रतिषेधः, अत्यन्ताभावः, अन्योन्याभावः, समस्तः, असमस्तः

## प्रस्तावना
"पुरुषस्य निवर्तकं वाक्यं निषेधः। निषेध-वाक्यानामनर्थहेतु-क्रिय-निवृत्ति-जनकत्वेनैवार्थवत्त्वात्।"[1] निषेधार्थे नञ् इति अव्ययं प्रयुक्तम्। वैयाकरणानां मते पर्युदासः प्रसज्यप्रतिषेधश्च भेदे नञ् द्विविधः। एवमुक्तम-

"द्वौ नञौ समनुख्यातौ पर्युदासप्रसज्यकौ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्॥"[2]

पर्युदासो नञ् आरोपविषत्वं द्योत्यम्। अतः "आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत्"[3] उक्तिरियं संगच्छते।

---

[1] अर्थसंग्रहः, पृष्ठा ९७।

[2] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, भावप्रकाशिकाटीका, पृष्ठा १५९।

[3] वैयाकरणभूषणसारः, कारिका ४०।

आरोपविषयद्योतकत्वञ्च नञा समभिव्याहृतानि यानि पदानि तेषामारोपितं यद्प्रवृत्तिनिमित्तं तद्बोधकत्वे तात्पर्यग्राहकत्वम्। यथा 'अब्राह्मणः आगच्छति' इत्यत्र 'अब्राह्मणः' पदस्यार्थो भवति 'न ब्राह्मणः' । अत्र ब्राह्मणस्याभावे आरोपितब्राह्मणत्ववान् क्षत्रियादिरितिबोधः। पर्युदासस्थले प्रवृत्तिनिमित्तारोपो भवति । अयं चारोपः सदृशे एव भवति । आरोपविषयत्वरूपो नञर्थः शब्दवृत्त्या प्रतीयते किन्तु सादृश्यप्रतीतिस्तु अर्थत एव भवति, सदृशे एवारोपादिति बोध्यम् । अतोऽब्राह्मण इत्यनेन पदेन ब्राह्मणसदृशः परन्तु ब्राह्मणभिन्नं क्षत्रियादि बोधः।

पर्युदासप्रतिषेधे विधेः प्राधान्यं प्रतिषेधस्य चाप्राधान्यमुत्तरपदेन सह नञः स्थितिः । तदुक्तम्-

"प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रत्तरपदेन नञ् ।।"[4]

अपि च समस्त एव पर्युदासस्य विषयः । यथा- अब्राह्मणः, अघटः, अनुदरा प्रभृतः। क्वश्चित्तु समासो विकल्पाद् असमासेऽपि पर्युदासो भवति । यथा-घटः अपटो भवतीत्यर्थके घटो न पट इत्यादै पर्युदासो भवति । पर्युदासार्थो नञ्षट्विधः, यथा-

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्रशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥"[5]

यथाक्रमे उदाहरणानि १. अनश्वः = अश्वसदृशः २. अपापम् = पापाभावः ३.अमनुष्यम् = मनुष्यभिन्नम् ४.अनुदरा = ईदुदरविष्टा ५.अब्राह्मणः = अप्रशस्तब्राह्मणः ६.असुरः = सुरविरुद्धः । अत्र कारिकोक्तषु षटर्थेषु अभावः प्रसज्यप्रतिषेधस्थले प्रतीयते। यथा- अपापम् = पापाभाव इत्यर्थः । पर्युदासस्थले अन्ये पञ्चार्थाः प्रतीयन्ते इति बोध्यम् । महर्षिपाणिना "आतोऽनुपसर्गे कः"(३/२/३) इत्यत्र 'अनुपसर्गे' पर्युदासपक्षः स्वीकृतः । महाभाष्यकारेण "सुडनपुंसकस्य" (१/१/४२) इत्यत्र 'अनपुंसकस्य' पदे पर्युदासपक्षः समर्थितः । तेनोक्तम्- "नायं प्रसज्यप्रतिषेधः नपुंसकस्य नेति । किं तर्हि ? पर्युदासो यं यदन्यन्नपुंसकादिति ।"[6]

यत्र विधेरप्राधान्यं प्रतिषेधस्य प्राधान्यं तत्र प्रसज्यप्रतिषेधकत्वम्, प्रसज्यप्रतिषेधे क्रियया सह नञस्य सम्बन्धो भवति । एवमुक्तम्-

"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ।।"[7]

तत्र प्रसज्यप्रतिषेधो भवति "यत्र क्रियापदेन नञः सम्बन्धो वाक्यभेदश्च ।"[8] "प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ।"[9] अत्र क्रिया ग्रहणं गुणस्यप्युपलक्षणम् । अतो भाष्यकारेणोक्तम्- "प्रसज्यायं क्रियागुणै ततः पश्चान्निवृत्तिं करोति"[10] अर्थात् क्रियाभावे प्रसज्यप्रतिषेधो विधीयते अथैव गुणाभावेऽपि प्रसज्यप्रतिषेधो प्रतीयते । गुणस्योदाहरणम्- "नास्माकमेकप्रियमिति"[11] अत्र एकत्वसंख्यायाः प्रतिषेधेन बहुत्वादिसंख्यान्तरप्रतीतिर्भवति । तदुक्तं कैयटेन-"अत्रैकत्वसंख्याप्रतिषेधादेव संख्यान्तरयुक्तवस्तुप्रतीतिः।"[12] क्रियोदारणम्- "अनचि च" (८/४/४७),"अकर्त्तरि च कारके" (३/३/१९) इत्यत्र नञ् क्रियया सह सम्बन्ध्यते।

समस्तोऽसमस्तो भेदे प्रसज्यप्रतिषेधनञो द्विविधः[13] । ननु समासे प्रसज्यप्रतिषेधे किम्मानमत आह- "तत्र विशेष्यतया क्रियान्वयनियमात् सुबन्तेनासामर्थेऽपि 'असूर्यललाटयोः(३/२/३६) इत्यादिज्ञापकात् समासः।"[14] अत्रेदं बोध्यम- सूर्यं न पश्यन्तीत्यर्थे 'असूर्यम्पश्या' इत्यत्र असूर्योपपदात् दृश्धातोः खश्-विधानं करोति। तन्न सम्भवति, नञर्थस्य विशेष्यतया दृशिक्रियायामन्वयात् सुबन्तेन सूर्यशब्देनान्वयाभावात् सामर्थ्याभावेन तदप्राप्तेः। सुबन्तेन सूर्यशब्देनान्वयाभावात् समासाभावात् "असूर्यललाटयोर्दृशितपोः"(३/२/३६) इत्यनेन असूर्योपपदात् दृश्धातोः खश्-विधानं व्यर्थम्, व्यर्थीभूय ज्ञापयति सुबन्तेन सूर्यशब्देनान्वयाभावेऽपि समासः । समसस्थलीयस्य तु प्रसज्यप्रतिषेध-नञोऽत्यन्ताभावोऽर्थः[15], असमासस्थलीयस्य

[4] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, भावप्रकाशिकाटीका, पृष्ठा १५९ ।

[5] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, पृष्ठा१५९ ।

[6] "सुडनपुंसकस्य" (१/१/४२) सूत्रस्य व्याकरणमहाभाष्यम् ।

[7] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, भावप्रकाशिकाटीका, पृष्ठा १५९ ।

[8] वाक्यपदीयम्, वाक्यकाण्डम्, ८५ कारिकास्थितो हेलाराजः ।

[9] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, भावप्रकाशिकाटीका, पृष्ठा १५९ ।

[10] "नञ्" (२/२/६) सूत्रस्य व्याकरणमहाभाष्यम् ।

[11] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, पृष्ठा१६२।

[12] "नञ्" (२/२/३) सूत्रस्य प्रदीपटीका।

[13] "प्रसज्यप्रतिषेधस्तु समस्तोऽसमस्तश्चेति द्विविधः।" परमलघुमञ्जूषा, निपातार्थनिरूपणम्, पृष्ठा१५९ ।

[14] परमलघुमञ्जूषा, निपातार्थनिरूपणम्, पृष्ठा१६२ ।

[15] "तादात्म्येतरसम्बन्धाभावोऽत्यन्ताभावः।" परमलघुमञ्जूषा, निपातार्थनिरूपणम्, पृष्ठा१५९ ।

प्रसज्यप्रतिषेध-नञोऽत्यन्ताभावोऽन्योन्याभावश्च [16] । समस्तनञोऽत्यन्ताभावस्योदाहरणम्- 'असूर्य्यम्पश्याः राजदाराः' इति । सूर्य-कर्मकदर्शनप्रतियोगिकाभावन्तः राजदारा इत्यर्थः । असमस्तनञोऽत्यन्ताभावस्योदाहरणम्- 'गेहे घटं नास्ति' इत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः । असमासस्थलीयस्य पर्युदासोऽन्योन्याभावस्योदाहरण्- 'घटो न पटः' इत्यत्र आरोपितपटत्ववान् घट् इति शाब्दबोधः । अतः पर्युदासप्रसज्यप्रतिषेधो विषये यद् नियमो वर्तते । तदानुसारे कस्मिन्नर्थे "अनचि च" (८/४/८७) सूत्रे नञ् विधीयते तद्विचार्यम्। "अनचि च" (८/४/८७) इत्यत्र न अच् = अनच्, तस्मिन् अनचीति नञ्तत्पुरुषसमासो[17] विधीयते । अतः "अनचि च" (८/४/८७) इत्यत्र 'अनच्' इति पदे नञ् कस्मिन्नर्थे व्यवहृतम् ? पर्युदासार्थे प्रसज्यप्रतिषेधार्थे वा इति प्रश्नः सञ्जातः । वैयाकरणानां मध्ये पारस्पारिकं वैमत्यं प्रकटितम् । महाभाष्यकार-काशिकाकार-प्रक्रियाकौमुदीदिनां वैयाकरणानां पर्युदासार्थः स्वीकृतः । शेखरकार-सिद्धान्तकौमुदीकार-बालमनोरमाकार-प्रदीपकारादिनां वैयाकरणानां प्रसज्यप्रतिषेधार्थः स्वीकृतः। अतः प्रबन्धेऽस्मिन् वैयाकरणानां मध्ये वैमत्यमुल्लिख्य "अनचि च" (८/४/८७) सूत्रे नञर्थसमीक्षा प्रस्तूयते ।

"अनचि च" (८/४/८७) इत्यत्र "यरोऽनुनासिकेऽनुनासिको वा" (८/४/४५) इत्यतः 'यरः' इति षष्ठ्यन्तं 'वा' इति अव्ययं पदं चानुवर्तते । "अचो राहाभ्यां द्वे" इत्यतः 'अचः' इति पञ्चम्यन्तं 'द्वे' इति प्रथमान्तं पदं चानुवर्तते । अतः सूत्रशरीरं भवति- 'अचः यरः द्वे वा अनचि च' इति । अचः परस्य यरो द्वे वा स्तो नत्वचीति सूत्रार्थः । उदाहरणं यथा- 'सुधी + उपास्यः' इत्यवस्थायां "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१/१/६६), "स्थानेऽन्तरतमः" (१/१/५०) इति सूत्रद्वयसहकारेण "इको यणचि" (६/१/७७) इत्यनेन ईकारस्य यकारे 'सुध् य् उपास्यः' इति जाते विकल्पे "अनचि च" (८/४/४७) सूत्रस्य प्रवृत्तिर्भवति । अतो उकारोत्तरवर्ती 'यर्' प्रत्याहरवर्णस्य धकारस्य द्वे भवति, अचोऽभावे । 'न अच् = अनच्' इत्यत्र नञ् पर्युदासार्थे प्रसज्यप्रतिषेधार्थे वा इति शङ्का । यदि पर्युदासार्थोऽभिप्राये 'अच् यरो द्वे वा हलि परे' इति सूत्रार्थो भवति । प्रसज्यप्रतिषेधार्थे अचः परस्य यरो द्वे वा स्तो नत्वचीति सूत्रार्थो भवति । अतः 'सुध् य् उपास्यः' इत्यत्र धकारस्य विकल्पे द्वित्वे 'सुध् ध् य् उपास्यः' इतिस्थिते "झलां जश् झशि" (८/४/५३) इत्यनेन धकारस्य दकारे 'सुद्ध्युपास्यः' इति रूपसाधने कापि समस्या नास्ति ।

परन्तु महाभाष्यकारेण अवसाने द्वित्वविधानार्थं पर्युदासप्रतिषेधार्थः स्वीकृतः । पर्युदासार्थः स्वीकारे "अवसाने च" [18] इति वार्त्तिकस्य प्रयोजनमावश्यकम् । अतोऽनेन वार्त्तिकेन विकल्पे वाक्क् वाक्, त्वक्क् त्वक्, स्रक्क् स्रक् इत्यादि रूपं सिद्धम्[19] । परक्षणे वार्त्तिकं प्रत्याख्यनं कृतम्। भाष्यकारेणोक्तम्- "न वक्तव्यम् । नायं प्रसज्यप्रतिषेधः -'अचि ने'ति । किं तर्हि पर्युदासोऽयं 'यदन्त्यदच' इति।" [20] परन्तु महाभाष्याकारस्य अस्मिन् वाक्ये असङ्गतिरस्ति। वस्तुतः "नायं पर्युदासः, प्रसज्यप्रतिषेधोऽयम्-'अचि च' । 'यदन्त्यदच"[21] इति पाठः करणीयः। अस्मिन् प्रसङ्गे प्रदीपकारेणोक्तम्- "पाठोऽयं लेखकप्रमादान्नष्ट,-पर्युदासे ह्यच्सादृशस्य वर्णान्तरस्य निमित्तत्वेनोपादवसाने द्विर्वचनस्याऽप्रसङ्गात् । तस्मात् नायं पर्युदासो यदन्यदच इति । किं तर्हि - प्रसज्यप्रतिषेधोऽचि ने'त्ययं पाठः ।" [22] प्रदीपकारेण महाभाष्यकारस्य मतं समालेचनं कृत्वा प्रसज्यप्रतिषेधः स्वीकृतः । तेनोक्तम्-"तत्र प्रसज्यप्रतिषेधे विधिरनुमीयते । अच उत्तरस्य यरो नूनं द्विर्वचनं सर्वत्रास्ति यतोऽचि प्रतिषिध्यते। एवं चाऽनैमित्तिककं द्विर्वचनमवसानेऽपि भवति । वेत्यधिकाराच्च वा भवति ।"[23]

कशिकाकारेणोक्तम्- "अनच्परस्य अच उत्तरस्य यरो द्वे वा भवतोऽनचि परतः ।" [24] अनेन व्याख्यया पर्युदासपक्षः समर्थितः । पर्युदसाश्रयणादेव वाक् वाक्क्, त्वक् त्वक्क्, षट् षट्ट्, तत् तत्त् इत्यादयः द्वित्वविधानार्थम् "अवसाने च यरो द्वे भवत इति वक्तव्यम्" [25] इति वार्तिकमङ्गीकृतम् । न्यासकारेण काशिकाकास्य मतं समर्थितम् । तेनोक्तम्- "प्रसज्यप्रतिषेधे सति प्रतिपत्तिगौरवभयात् पर्युदाश्रयणम् ।" [26] पदमञ्जकारेण पर्युदासाश्रयणात् अवसाने द्वित्वविधानार्थं वार्त्तिकं प्रारब्धम्, प्रसज्यप्रतिषेधे तु परस्य निमित्तस्यानश्रयणात् 'वा' इति प्रतिपाद्य प्रसज्यप्रतिषेधपक्षे आग्रहः प्रकटितः ।[27]

---

16 "तादात्मसम्बन्धाभावोऽन्योन्याभावः।" तदेव

17 "नञ्" (२/२/६)

18 "अनचि च" (८/४/८७) सूत्रे व्याकरणमहाभाष्यस्थितो वार्तिकम् ।

19 "अवसाने च द्वे भवत इति वक्तव्यम्। वाक्क् वाक् । त्वक्क् त्वक् । स्रक्क् स्रक् । तत्तर्हि वक्तव्यम् ।" "अनचि च" (८/४/८७) सूत्रस्य व्याकरणमहाभाष्यम् ।

20 "अनचि च" (८/४/८७) सूत्रस्य व्याकरणमहाभाष्यम् ।

21 व्याकरणमहाभाष्यम्(अष्टमोऽध्यायः), सम्पादकः हरिनारायणतिवारी, पृष्ठा ३३२ ।

22 "अनचि च" (८/४/८७) सूत्रस्य प्रदीपटीका ।

23 तदेव

24 "अनचि च" (८/४/८७) सूत्रस्य काशिकावृत्तिः ।

25 "अनचि च" (८/४/८७) सूत्रस्य काशिकावृत्तिस्थितो वार्तिकम् ।

26 "अनचि च" (८/४/८७) सूत्रस्य न्यासटीका ।

27 "पर्युदासाश्रयणादिदमारब्धम । प्रसज्यप्रतिषेधे तु परस्य निमित्तस्यानाश्रयणाद् 'वा' इत्यधिकारात्सिद्धम् ।" "अनचि च" (८/४/८७) सूत्रस्य पदमञ्जरीटीका ।

प्रक्रियाकौमुदीकारेण "अनचि च"(८/४/८७) इत्यत्र न अच् = अनच्, तस्मिन् अनचीति नञ्समासे नञर्थः पर्युदासपक्षः समर्थितः । तेनोक्तम्-" अचः परस्य यरोऽनचि परे द्वे स्तः ।"[28] अनचीति पदेन तद्भिन्नं तत्सादृश्यम् अर्थात् अज्भिन्नम् अच्सादृश्यमिति पर्युदासपक्षः अङ्गीकृतः। प्रकाशकारेणोक्तम- "अनचीति यदि पर्युदासः स्यात्ततो 'नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः' (परि० ७५) इति न्यायादज्भिन्नेऽच्सदृशे वर्णे हलीत्यर्थः स्यात्ततो लाघवाद्धलीत्येव वदेत् । तस्मात्प्रसज्यप्रतिषेधोऽयम् अचि नेति ।"[29] अर्थात् उक्तपरिभाषानुसारं नञ्युक्तं इवयुक्तं पदं तद्भिन्ने तत्सदृशेऽर्थे वर्तते। यथा- 'अब्राह्मणोऽयम्' इत्यनेन पर्युदासस्थले ब्राह्मणभिन्ने ब्राह्मणसदृशे क्षत्रियादिरिति बोधः । अतोऽनचीत्यत्र पर्युदासपक्षे अज्भिन्नेऽच्सदृशे हलादिरिति बोधः, तर्हि लाघवात् "हलि च" इति सूत्रं कर्तव्यम् । परन्तु एवं न कृतम् । तस्मात्प्रसज्यप्रतिषेधोऽयम् । इतोऽपि प्रकाशकारेणोक्तम्- "असूर्यललाटयोः'(३/२/३६) इति ज्ञापकादसमर्थेनापि नञः समासः। तेनावसानेऽपि द्वित्वं भवति । वाक्क् त्वक्किति।"[30] अतः प्रकाशकारेण पर्युदासो दोषं प्रदर्श्य प्रसज्यप्रतिषेधपक्षोऽङ्गीकृतः ।

भट्टोजिदीक्षितेन अनचीत्यत्र प्रसज्यप्रतिषेधपक्षः अङ्गीकृतः । "अचः परस्य यरो द्वे वा स्तो न त्वचि"[31] इत्यनेन प्रसज्यप्रतिषेधपक्षः स्पष्टतया परिलक्षिता । दीक्षितेन यदि पर्युदासप्रतिषेधार्थः समर्थितः तर्हि विधिप्रधानं निषेधोऽप्रधानं इति बोधः । पर्युदासप्रतिषेधपक्षे अज्भिन्नेऽच्सदृशे हलादिरिति बोधो भवति । पर्युदासप्रतिषेधपक्षे लाघवोऽपि भवति । 'अनचि' त्र्यक्षरविशिष्टं चतुर्मात्रायुक्तञ्च पदमिदम्, परन्तु 'हलि' द्व्यक्षरविशिष्टं त्रिमात्रायुक्तञ्च । तर्हि एकमात्रालाघवोऽपि भवति । अतः पाणिनिना 'अनचि च' इति सूत्रं विहाय 'हलि च' इति सूत्रं कर्तव्यम् । तर्हि अवसाने रामात्/रामाद् इति पदस्य पञ्चम्यैकवचने विकल्पे तकारस्य द्वित्वविधाने समस्या विद्यते । 'राम' शब्दस्य पञ्चम्यैकवचने 'ङसि' प्रत्यये अनुबन्धलोपे 'राम अस्' इति स्थिते "टाङसिङसामिनात्स्याः" (७/१/१२) इत्यनेन 'ङसि' स्थाने 'आत्' आदेशे 'राम आत्' इति जाते "अकः सवर्ण दीर्घः" (६/१/१०१) इत्यनेन दीर्घे रामात् इति जाते "झलां जशोऽन्ते" (८/२/३९) इत्यनेन पदान्ते तकारस्य दकारे रामाद् इति एकं रूपं जातम् । ततः "वाऽवसाने" (८/४/५६) इत्यनेन विकल्पे दकारस्य तकारे रामात् इति अपरं रूपं सिद्धम् । अतः रामाद्, रामात् इति रूपद्वयं सिद्धम्। ततः रामाद्-रामात् इत्यत्र "अनचि च" (८/४/८७) इत्यनेन विकल्पे तकादकारयोः द्वित्वे प्राप्ते, 'अनच्' पदे पर्युदासार्थे द्वित्वं न सम्भवम्। परन्तु यदि प्रसज्यप्रतिषेधार्थे अवसाने तकारदकारयोः द्वित्वे रामाद् = रामाद्द्, रामात् = रामात्त् इति रूपचतुष्टयं सिद्धम् । बालमनोरमाकारेण सिद्धान्तकौमुदीकारस्य मतं समर्थितम्- "न अच् अनच्, तस्मिन् अनचीति न पर्युदासः । तथा सति 'नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिः' इति न्यायेन अज्भिन्ने हलीत्यर्थः स्यात् । तथा सति लाघवाद्धलीत्येव वदेत् । रामात्-इत्याद्यवसानेषु च द्वित्वं न स्यात् ।"[32] तत्त्वबोधिनीकारेणापि प्रसज्यप्रतिषेधार्थः समर्थितः ।[33]

मञ्जूषाकारस्य मतं प्रसज्यनञः क्रियागुणोभयर्निषेधबोधकत्वम् । तेन गुणस्योदारणादनन्तरं क्रियोदाहरणम्-"अनचि च" (८/४/८७) इति प्रदत्तम्[34]। अतोऽनचीतित्यनेन "अजव्यवहित-पूर्वत्वावच्छिन्नयर्निष्ठस्थानितानिरूपितादेशतावद्द्वित्वकर्तृक सत्ताप्रतियोगिकोभव इति बोधः ।"[35] अतो मञ्जूषाकारेणापि "अनचि च" (८/४/८७) इति सूत्रे प्रसज्यप्रतिषेधपक्षः समर्थितः । समस्तस्य असमस्तस्य च प्रसज्यप्रतिषेधोऽत्यन्ताभावोऽर्थः, अतः समस्तनञोऽत्यन्ताभावस्योदाहरणमपि "अनचि च" (८/४/८७), अचः परस्य यरो द्वित्वमचि परे निषेधयति। लघुशब्देन्दुशेखरकारेणापि प्रसज्यप्रतिषेधनञः स्वीकृतः । तेनोक्तम- "अवसाने द्वित्वसिद्धयेऽनचीति प्रसज्यप्रतिषेधस्तदाह- न त्वचीति ।"[36]

सिद्धान्तकौमुदीयाः लक्ष्मीटीकाकारेण भाष्यमतं पुरस्कृत्य प्रसज्यप्रतिषेधपक्षः समर्थितः। तेनोक्तम्- "केचित्तु 'प्राप्तौ सत्यं निषेधः' इति नियमाद्विषेधेन विधिरनुमीयते । स च विधिः परनिमित्तको न भवति । तथा च अचः परस्य यरोऽवसानेऽपि द्वित्वं सिध्यति । अत एव 'अवसाने च द्वे भवत इति वक्तव्यम्' 'वाक्क्, वाक्' इत्युक्ता । 'न वक्तव्यम् । नायं पर्युदासो यदन्यदच इति । किं तर्हि प्रसज्यप्रतिषेधोऽचि नेति' इति भाष्ये उक्तम् । एतेन प्रसज्यप्रतिषेधेऽसमर्थसमासः, नञः क्रियया सह सम्बन्धेन समासाप्राप्तेः । वाक्यभेदः, विधिनिषेधयोरेकेन वाक्येन वक्तुमशक्यत्वात्, शास्त्रबाधश्चेति गौरं लक्ष्यानुरोधात्योढत्वमिति सूचितम् । पर्युदासे तु

---

28 "अनचि च" (८/४/८७) सूत्रस्य प्रक्रियाकौमुदी ।

29 "अनचि च" (८/४/८७) सूत्रस्य प्रक्रियाकौमुदीस्थितः प्रकाशव्याख्या ।

30 तदेव ।

31 "अनचि च"(८/४/८७) सूत्रस्य सिद्धान्तकौमुदी ।

32 "अनचि च"(८/४/८७) सूत्रस्य बालमनोरमा टीका ।

33 "अनचि' इति यदि पर्युदासः स्यात्ततो 'नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिः' इति न्यायादिज्भिन्नेऽच्सदृशे वर्णे हलीत्यर्थः स्यात्, ततो लाघवाद् हलीत्येव वदेत्, तस्मात् प्रसज्यप्रतिषेध इत्याह- नत्वचीति । एवं चावसानेऽपि द्वित्वं भवति । वाक्, वाक्क् ।" "अनचि च" (८/४/८७) सूत्रस्य तत्त्वबोधिनी टीका ।

34 परमलघुमञ्जूषा, निपातार्थनिरूपणम्, पृष्ठा- १६२ ।

35 परमलघुमञ्जूषा, निपातार्थनिरूपणम्, भावप्रकाशिकाटीका, पृष्ठा- १६३ ।

36 लघुशब्दन्दुशेखः, अच्सन्धिप्रकरणम् पृष्ठा -११९ ।

'नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिः' नञ्युक्तम्, इवयुक्तश्च पदं तद्भिन्ने तत्सदृशेऽर्थे वर्तते ।"[37]

**उपसंहारः**

आलोचनावसरे एवं वक्तुं शक्यते- "अनचि च" (८/४/८७) इत्यत्र प्रसज्यप्रतिषेधपक्षः समीचीनः । पर्युदासे तु 'नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिः' इति न्यायेन नञ् युक्तम्, इव युक्तं चपदं तद्भिन्ने तत्सदृशेऽर्थ विद्यते । यतः तथैवार्थबोधस्तस्मादित्यर्थकन्यायात् । 'अनचि' इत्यस्य अञ्भिन्ने वर्णे परेऽचः परस्य यरो वा द्वित्वमित्यर्थे वाक्क् इत्यादौ अवसाने परे द्वित्वं न स्यात् । प्रसज्यप्रतिषेधेऽसमर्थसमासः वाक्यभेदः, विधिनिषेधयोरेकेन वाक्येन वक्तुमशक्यत्वात् शास्त्रबाधश्चेति गौरवत्वेऽपि लक्ष्यारोधात् सोढव्यम् ।

**सहायकग्रन्थसूची**


1. इश्वरचन्द्र, सम्पादकः। *अष्टाध्यायी* (*चन्द्रलेखा*-हिन्दीव्यख्या सहिता) । दिल्ली : चौखम्बा संस्कृत प्रतिष्टान,प्रथमभागः द्वितीयभागश्च २०१७।
2. तिवारी, हरिनारायण, सम्पादकः। *व्याकरणमहाभाष्यम्* (*ज्योत्सना* समुद्भाषितम्) । वराणसी : चौखम्ब संस्कृत प्रतिष्टान, अष्टमोऽध्यायः २०१४।
3. त्रिपाठी,जयशङ्करलाल, सम्पादकः। *काशिका* (*न्यास-पदमञ्जरी-भावबोधिनी* सहिता)। वाराणसी : तारा बुक एजेन्सी, दशमभागः २०१५।
4. त्रिपाठी, जयशङ्करलाल, सम्पादकः। *परमलघुमञ्जूषा* (भावप्रकाशिका बालबोधिनी च संस्कृत-हिन्दी-व्याख्योपेता)। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१७।
5. द्विवेदी, चन्द्रिकाप्रसाद, सम्पादक। *वैयाकरणभूषणसारः* । दिल्ली : चौखम्वा संस्कृत प्रतिष्ठान, २०१६।
6. पञ्चोली,बालकृष्णः,सम्पादकः। *वैयाकरणसिद्धान्तकौमुदी* (*लक्ष्मी*व्याख्या सहिता)। दिल्ली : मोतिलाल बनारसी दास, प्रथमभागः द्वितीयभागश्च १९६६।
7. पाण्डेय, व्रजमोहन, सम्पादकः। *संस्कृत व्याकरण की प्रविधिक शब्दावली का विवेचन* । वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय,२००५।
8. पाण्डेय, रमाकान्त, सम्पादकः। *प्रौढमनोरमा* (*सशव्दरत्न-भैरवी-अयुषी*-हिन्दीव्याख्याभूषिता)। वाराणसी : चौखम्बा विद्याभवन, प्रथमभागः२०१२।
9. मिश्र, मुरलीधर, सम्पादकः। *प्रक्रियाकौमुदी* (*प्रकाश*-व्याख्या रश्मिटिप्पनी संवलिता)। वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, प्रथमभागः – तृतीयभागः २००० ।
10. शर्मा, दधिराम, सम्पादकः। *व्याकरणमहाभाष्यम्* (*भाष्यप्रदीपोद्द्योत*समुल्लसितम्)। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, षष्ठं खण्डं संस्करणम् २०१४।
11. शर्मा, गिरिधर परमेश्वरानन्द च सम्पादकौ। *वैयाकरणसिद्धान्तकौमुदी* (*बालमनोरमा-तत्त्वबोधिनी*-सहिता)। दिल्ली : मोतिलाल बनाररसीदास, प्रथमभागः २०१०।
12. शर्मा, शिवप्रसाद श्रीनिवासशर्मा च सम्पादकौ। *लघुशब्देन्दुशेखरः* (पञ्चसन्ध्यन्तो भागः)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१६।
13. शास्त्री जोशी, भार्गव, सम्पदकः। *व्याकरणमहाभाष्यम्* (*भाष्यप्रदीपोद्द्योत*समुल्लसितम्) । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, प्रथमभागः, चतुर्थभागः पञ्चभागश्च, संस्करणम् २०१४।
14. शर्मा, लक्ष्मी, सम्पादिका। *वैयाकरणसिद्धान्तकौमुदी* (*श्रीधरमुखल्लासिनी* हिन्दीव्याख्या सहिता) । वाराणसी : चौखम्बा सुरभारती प्रकाशन, प्रथमभागः २०१७।
15. शर्मा,रघुनाथ, सम्पादकः। *वाक्यपदीयम्* । वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, द्वितीयभागः २०१६।


[37] "अनचि च" (८/४/८७) सूत्रस्य लक्ष्मी टीका ।